श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री रङ्गनाथ मङ्गळम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री रङ्गनाथ मङ्गळम् ॥

मङ्गळं रङ्गनाथाय मम नाथाय मङ्गळम्।
मङ्गळं लोकनाथाय लक्ष्मीनाथाय मङ्गळम्॥ 1 ॥

लक्ष्मीचरणलाक्षाङ्क साक्षि श्रीवत्सवक्षसे।
क्षेमङ्कराय सर्वेषां श्रीरङ्गेशाय मङ्गळम्॥ 2 ॥

सैकते सह्यकन्यायास्तरङ्गानिव शीतले।
अतिरङ्गं भुजङ्गेन्द्रे सुखसुप्ताय मङ्गळम्॥ 3 ॥

रजताद्रिनिषण्णेन्द्रनीलशैलानुकारिणे।
शेषे शयाय श्यामाय श्रीरङ्गेशाय मङ्गळम्॥ 4 ॥

बाहुमेकं प्रसार्यान्यं उपदायाति पन्नगम्।
निद्राणाय जगद्रक्षाजागरूकाय मङ्गळम्॥ 5 ॥

परिष्कृतासनाम्भोजपरस्परतलाङ्घ्रये।
स्फुरत्पीताम्बरायास्तु श्रीरङ्गेशाय मङ्गळम्॥ 6 ॥

दर्शिताभयमुद्राय भक्तानां तद्विरोधिनाम्।
दीप्तदिव्यायुधायास्तु श्रीरङ्गेशाय मङ्गळम्॥ 7 ॥

सुस्मिताय सुनासाय सुदृशे सुन्दरभ्रुवे।
सुललाटकिरीटाय श्रीरङ्गेशाय मङ्गळम्॥ 8 ॥

तरङ्गितदयैर्विश्वं अपाङ्गैरभिषिञ्चते।
सम्राजे सर्वलोकानां श्रीरङ्गेशाय मङ्गळम्॥ 9 ॥

इक्ष्वाकोर्विधिलब्धाय विभीषणकृते पुनः।
विस्राणिताय रामेण श्रीरङ्गेशाय मङ्गळम्॥ **10** ॥

ज्ञानसिद्धाञ्जनेनास्मद्देशिकैर्दर्शिताय मे।
नित्ये नित्यपूर्णाय श्रीरङ्गेशाय मङ्गळम्॥ **11** ॥

मङ्गळाशासनपरैर्मदाचार्यपुरोगमैः।
सर्वैश्च पूर्वैराचार्यैः सत्कृतायास्तु मङ्गळम्॥ **12** ॥

॥ श्री रङ्गनाथ मङ्गळं समाप्तम्॥